॥श्री:॥

अवधविहारीसंस्कृतमहाविद्यालय: , रहीमपुर , खगड़िया

अङ्गीभूत:- कामेश्वर सिंह दरभंगा संस्कृत विश्वविद्यालय: , दरभङ्गा

शास्त्री 2 खण्ड: , विषय:- साहित्यम् ,

अनिवार्य दर्शनम् , प्रथम-प्रश्नपत्रम् ,

[ तर्कसंग्रह: - प्रत्यक्षपरिच्छेद: - न्यायबोधिनीसंव: ]

श्रीमद् अन्नंभट्टेन वायुर्लक्षणमुक्तं -

रूपरहितस्पर्शवान् वायु: । न्यायबोधिनीकार: कथयति - रूपरहितत्वे सतिस्पर्शवत्वं वायोर्लक्षणम् । अत्र आकाशादावतिव्याप्तिवारणाय विशेष्योपादानं विहितम् । तत्र किन्नाम तावत् अतिव्याप्तिरिति प्रसङ्गात् तल्लक्षणं कथयति - अतिव्याप्तिर्नाम - अलक्ष्ये लक्षणसत्त्वम् । अलक्ष्ये - लक्ष्यादन्यत्र महिष्यादौ , लक्षणस्य - श्रृङ्गित्वादे: , सत्त्वम् - विद्यमानत्वम् । यथा - गो: श्रृङ्गित्वं लक्षणं कृतञ्चेत् - लक्ष्यभूतगोमहिष्यादावतिव्याप्ति: , तत्रापि श्रृङ्गित्वस्य विद्यमानत्वात् । अव्याप्तिमाह - अव्याप्तिर्नाम - लक्ष्यैकदेशावृत्तित्वम् । लक्ष्यैकदेशे - लक्ष्यतावच्छेदकाश्रयीभूते क्वचिल्लक्ष्ये लक्षणासत्त्वमव्याप्तिरित्यर्थ: । यथा - गोर्नीलरूपवत्त्वं लक्षणं कृतं चेल्लक्ष्यतावच्छेदकाश्रयीभूतश्वेतगवि अव्याप्ति: , तत्र नीलरूपाभावात् । असंभवमाह - असंभवो नाम लक्ष्यमात्रे कुत्रापि लक्षणासत्त्वम् । यथा - गोरेकशफवत्त्वम् । गोसामान्यस्य द्विशफवत्वेन एकशफवत्त्वस्य कुत्राप्यसत्त्वात् ।

अतिव्याप्त्यव्याप्त्यसंभवानां निष्कृष्ट - लक्षणान्याह - लक्ष्यतावच्छेदकसमानाधिकरणत्वे सति लक्ष्यतावच्छेदकावच्छिन्नप्रतियोगिताकभेदसमानाधिकरण्यमतिव्याप्ति: । - गोर्लक्ष्यत्वे लक्ष्यतावच्छेदकं गोत्वम् , पृथिव्या लक्ष्यत्वे पृथिवीत्वं , वायोर्लक्ष्यत्वे वायुत्वमिति रीत्या लक्ष्यतावच्छेदकन्तु सर्वत्र बोध्यम् ।

समानाधिकरणत्वम् - एकाधिकरणवृत्तित्वम् । लक्ष्यतावच्छेदकेन समानाधिकरणं यस्य तत् लक्ष्यतावच्छेदकसमानाधिकरणम् - अर्थात् - लक्ष्यतावच्छेदकस्य गोत्वादेर्यद-

धिकरणं तदेव लक्षणस्यापि यद्यधिकरणं भवेत् ,तदा लक्ष्यतावच्छेदकसमानाधिकरणं तल्लक्षणं कथ्यते। यथा- गोत्वं गवि वर्तते तत्रैव शृङ्गित्वमपि वर्तते, अतः शृङ्गित्वं लक्ष्यतावच्छेदकसमानाधिकरणम् । उत्तरार्धस्यार्थस्तु- गवादिभेदसामानाधिकरण्यं, तच्च गवादिभेदाधिकरण- वृत्तित्वम्। एतदपि शृङ्गित्वे वर्तते। गौर्नेति भेदाधिकरणे महिषादौ शृङ्गित्वस्य वर्तमानत्वात्। अत्र भेदे विशेषणं गोत्वावच्छिन्नप्रतियोगिताकत्वम्। यस्याभावः स प्रतियोगी, तथा च गोभेदस्य प्रतियोगी गौरस्ति। प्रतियोगिता गोनिष्ठा। प्रतियोगितायाः निरूपकोऽभावो भवति; तथा च गोनिष्ठा या प्रतियोगिता तन्निरूपकसामानाधिकर- ण्यमिति लब्धम्। निरूपकत्वार्थे कप्रत्ययात् प्रतियोगिता- केत्येवास्ति। प्रतियोगितायां विशेषणं- लक्ष्यतावच्छेदका- वच्छिन्नेति। अर्थात्- लक्ष्यतावच्छेदकं गोत्वादिकं, तदवच्छिन्ना च गोनिष्ठा प्रतियोगिताऽस्त्येव। तथा च लक्ष्यतावच्छेदकीभूतगोत्वावच्छिन्ना या गोनिष्ठा प्रतियोगिता, तन्निरूपकगौर्नेतिभेदसामानाधिकरण्यस्य लक्ष्यतावच्छेदकसमानाधिकरणत्वस्य च शृङ्गित्वे सत्त्वात् शृङ्गित्वं न गोर्लक्षणम्, अतिव्याप्तिदोषेण ग्रस्तत्वादिति भावः।

अव्याप्तेनिष्कृष्टलक्षणमाह—

लक्ष्यतावच्छेदकसमानाधिकरणात्यन्ताभावप्रतियोगित्वम्- अयमर्थः- लक्ष्यतावच्छेदकसमानाधिकरणो योऽत्यन्ता- भावस्तत्प्रतियोगित्वमव्याप्तिरिति। यथा- गोर्यदि नीलरूपवत्त्वं लक्षणं कृतं स्यात्, तदा तदव्याप्तिदोषेण ग्रस्तं स्यात्। यतोहि लक्ष्यतावच्छेदकं गोत्वं, तत्समा- नाधिकरणोऽर्थात् गोत्वाधिकरणे वर्तमानोऽत्यन्ताभावो नीलरूपवत्त्वाभाव एव, गोत्वाधिकरणे श्वेतगवि

नीलरूपवत्त्वाभावात्, तादृशात्यन्ताभावप्रतियोगित्वं नीलरूपवत्त्वेऽस्ति। एवञ्च लक्ष्यतावच्छेदकगोत्वसमानाधिकरणात्यन्ताभावप्रतियोगित्वात् इदं लक्षणं मव्याप्तिदोषयुक्तम्।

असंभवस्य निष्कृष्टलक्षणमाह-

लक्ष्यतावच्छेदकव्यापकीभूताभावप्रतियोगित्वमिति। अत्र लक्ष्यतावच्छेदकव्यापकीभूतो योऽभावस्तत्प्रतियोगित्वमित्यर्थः। यथा- गोरेकशफवत्त्वं लक्षणं कृतं स्यात् तदा तल्लक्षणमसंभवदोषग्रस्तम्। लक्ष्यतावच्छेदकं गोत्वम्, तद्व्यापकीभूतोऽभावः एकशफवत्त्वाभावः, तत्प्रतियोगितायाः एकशफवत्त्वे सत्वात्। यथा- यत्र यत्र धूमो वर्तते तत्र तत्र वह्नेः सत्वात् धूमस्य वह्निर्व्यापको भवति, तथैव गोत्वं सर्वत्र गवि वर्तते तत्र चैकशफवत्त्वाभावस्यापि सत्वात् एकशफवत्त्वाभावो गोत्वव्यापकः।

तथा च लक्ष्यतावच्छेदकव्यापकीभूताभावप्रतियोगि
त्वात् एकशफवत्त्वमपि न गोर्लक्षणम् । किन्तु एतत्
त्रितयदोषरहितत्वात् सास्नावत्त्वमेवादुष्टं गोलक्षणं
मन्तव्यम् ।

एवंरीत्यैव रूपरहितत्वे सति स्पर्शवत्त्वमेव
वायोरदुष्टं लक्षणम् ।

इति शम् ।

शुभम्भूयात् ॥